स्थिताः। अस्माकन्तु मनोरथोपरचितप्रासाद-वापीतटक्रीड़ाकाननकेलिमण्डपयुषामायुः परं क्षीयते"। इति कर्म्मकर्त्तरि साध्यम्। इति दुर्गादासः॥

क्षि, ग्र वासगत्योः। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सकंच-अनिट्।) ग्र, क्षियति। इति दुर्गादासः॥

क्षि, त्रि, (क्षि+बाहुलकात् डिः।) निवासः। गतिः। क्षयः। इति मेदिनी॥

क्षिण, दु ञ वधे। इति कविकल्पद्रुमः॥ (तनां-उभं-सकं-सेट्-उदित्त्वात् क्त्वा वेट्।) द ञ, क्षिणोति क्षिणुते। उ, क्षिणित्वा क्षित्वा। इति दुर्गादासः॥

क्षितः, त्रि, (क्षि+कर्म्मणि क्तः।) हिंसितः। क्षितः कामो मया हिंसित इत्यर्थः। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षितिः, स्त्री, (क्षियति वसत्यस्याम्। क्षि+अधिकरणे क्तिन्।) अस्या अपरा व्युत्पत्तिर्यथा,—
"महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता।
काश्यपी कश्यपस्येयमचला स्थिररूपतः"॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ७ अध्यायः॥
पृथिवी। (यथा, मनौ ४।२४१।
"मृतं शरीरमुत्सृज्य काष्ठलोष्ट्रसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति"॥)
वासः। क्षयः। इत्यमरः।३।३।७०॥ कालभेदः। स तु प्रलयः। इति मेदिनी॥ रोचनानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ *॥

क्षितिकणः, पुं, (क्षितेः पृथिव्याः कणः।) धूलिः। इति त्रिकाण्डशेषः॥

क्षितिक्षमः, पुं, (क्षितिरिव क्षमते क्षिताविव क्षमाकारणीभूता शक्तिरस्मिन् वा।) खदिरवृक्षः। इति राजनिर्घण्टः॥

क्षितिजं, क्ली, (क्षिति+जन्+डः।) खगोले आकाशमध्यान्तर्वत्त्यशान्तरे तिर्य्यग्वृत्तम्। यथा,—
"पूर्व्वापरं विरचयेत् सममण्डलाख्यं
याम्योत्तरञ्च विदिशोर्व्वलयद्वयञ्च।
ऊर्द्धाध एवमिह वृत्तचतुष्कमेत-
दाबेध्य तिर्य्यगपरं क्षितिजं तदर्द्धे"॥
इति सिद्धान्तशिरोमणौ गोलबन्धाधिकारः॥

क्षितिजः, पुं, (क्षितेर्जायते इति। जन्+डः।) भूनागः। इति राजनिर्घण्टः। मङ्गलग्रहः। यथा,—
"परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम्।
करोति सोमपुत्रस्तु क्षितिजान्तर्दशागतः"॥
इति ज्योतिस्तत्त्वम्॥ भूजाते त्रि॥

क्षितिजन्तुः, पुं, (क्षितौ क्षितेर्वा जन्तुरिव।) भूनागः। इति राजनिर्घण्टः॥

क्षितिधरः, पुं, (क्षितिं पृथ्वीं धरति धारयति वा। धृ धारि+वा अच् णिच्पक्षे पूर्व्वरूपः।) पर्व्वतः। इति हलायुधः॥ (यथा, कुमारे।७।९४।
"अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण"॥)



कूर्म्मवासुकिदिग्गजाश्च॥

क्षितिनागः, पुं, (क्षितिजातो नागः। मध्यपदलोपी समासः।) भूनागः। इति राजनिर्घण्टः॥

क्षितिनाथः, पुं, (क्षितेः पृथिव्याः नाथः सहायः शास्ता इत्यर्थः।) राजा। (क्षितिपतिदर्शनात्॥)

क्षितिपः, पुं, (क्षितिं पातीति। पा+डः।) राजा। यथा,—"अहंयुनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण"॥
इति भट्टौ।१।२०॥ (यथा च पञ्चतन्त्रे।२।२४।
"यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम्।
वित्ताभावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित्"॥)

क्षितिपतिः, पुं, (क्षितेः पतिः पालकः।) राजा। यथा,—
"मूर्खोऽशान्तस्तपस्वी क्षितिपतिरलसो मत्सरी धर्म्मशीलो दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः"। इति नवरत्ने।६। (तथा च रघुः।६।८६।
"प्रमुदितवरपक्षमेकतस्तत्
क्षितिपतिमण्डलमन्यतोवितानम्"॥)

क्षितिपालः, पुं, (क्षितिं पालयतीति। पालि+"कर्म्मण्यण्"।३।२।१। इत्यण्।) राजा। यथा, प्रबोधचन्द्रोदयनाटके १ अङ्के।
"नीताः क्षयं क्षितिभुजो नृपतेर्विपक्षा
रक्षावती क्षितिरभूत् प्रथितैरमात्यैः।
साम्राज्यमस्य विहितं क्षितिपालमौलि-
मालार्च्चितं भुवि पयोनिधिमेखलायाम्"॥
(तथा, रघुः।२।५१।
"एतावदुक्त्वा विरते मृगेन्द्रे
प्रतिस्वनेनास्य गुहागतेन।
शिलोच्चयोऽपि क्षितिपालमुच्चैः
प्रीत्या तमेवार्थमभाषतेव"॥)

क्षितिपालभाक्, [ज्] पुं, (क्षितिपालं भजते इति। भज्+क्विप्।) राजा। यथा, भट्टौ ३।२१।
"आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद्द्युनिवासभूयम्"॥

क्षितिपुत्त्रः, पुं, (क्षितेः पृथिव्याः पुत्त्रः।) नरकराजः। (पुरा किल सिद्धेश्वरकपिलदेवकोपेन रसातलगतां भगवतीं क्षितिमुद्धर्त्तुं भगवान् विष्णुः वराहरूपेणावतीर्णः सन् तत्र दुर्द्दान्तं दितिनन्दनं हिरण्याक्षं निपात्य रसातलात्तामुद्धृत्य तस्यामेव धरायां नरकनामानं पुत्त्रमुत्पादयामास।) यथा,—
"स तीरे नदराजस्य लौहित्यस्य महात्मनः।
ब्रह्मार्च्चनं समारभ्य तपस्तप्तुमुपस्थितः॥
स मानुषेण मानेन क्षितिपुत्त्रः शतं समाः।
जलाहारव्रतेनैव समानर्च्च पितामहम्॥
स तुष्टः शतवर्षान्ते ब्रह्मा लोकपितामहः।
प्रत्यक्षीभूय नरकस्याग्रतः समुपस्थितः"॥
इति कालिकापुराणे ३८ अध्यायः॥ अन्यत् नरकशब्दे द्रष्टव्यम्॥ (मङ्गलग्रहः। इति ज्योतिस्तत्त्वम्॥)

क्षितिबदरी, स्त्री, (क्षितौ स्थिता सक्ता वा बदरी।) भूबदरी। इति राजनिर्घण्टः॥

क्षितिरुहः, पुं, (क्षितौ रोहतीति। रुह्+कः।) वृक्षः। इति हेमचन्द्रः॥ (यथा, विष्णुपुराणे १।१५।६।
"सन्धानं वः करिष्यामि सह क्षितिरुहैरहम्"॥)

क्षितिवर्द्धनः, पुं, (क्षितिं वर्द्धयति। वृध्+णिच् ल्युः।) शवः। इति त्रिकाण्डशेषः॥ भूमिवर्द्धके त्रि॥

क्षितिव्युदासः, पुं, (क्षितिं व्युदस्यति। वि+उत्+अस्+अण्।) गर्त्तः। भाँड़सी इति तद्दखाना इति च भाषा। इति केचित्॥

क्षित्यदितिः, स्त्री, (क्षितौ अदितिः। देवमातुरदित्याः पृथिव्यां देवकीरूपेणाविर्भावात्तथात्वम्।) देवकी। इति त्रिकाण्डशेषः॥ (एतद्विवरणं यथा,—हरिवंशे ५५ अध्याये।
वैशम्पायन उवाच।
"नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः।
प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः॥
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद!।
तस्य सम्यक् प्रवृत्तस्य श्रूयतामुत्तरं वचः॥
विदिता देहिनो जाता मयैते भुवि दानवाः।
यांश्च यस्तनुमास्थाय दैत्यः पुष्यति विग्रहम्॥
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि।
केशिनञ्चैव जानामि दैत्यं तुरगरूपिणम्॥
नागं कुवलयापीड़ं मल्लौ चाणूरमुष्टिकौ।
अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणम्॥
विदितो मे खरश्चैव प्रलम्बश्च महासुरः।
सा च मे विदिता विप्र! पूतना दुहिता बलेः॥
कालियञ्चैव जानामि यमुनाह्रदगोचरम्।
वैनतेयभयाद्यस्तु यमुनाह्रदमाविशत्॥
विदितो मे जरासन्धः स्थितो मूर्द्ध्नि महीक्षिताम्।
प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये॥
मानुषे पार्थिवे लोके मानुषत्वमुपागतम्।
बाणञ्च शोणितपुरे गुहप्रतिमतेजसम्॥
दृप्तं बाहुसहस्रेण देवैरपि सुदुर्ज्जयम्।
मय्यासक्ताञ्च जानामि भारतीं महतीं धुरम्॥
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः।
क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया॥
तेषां पुरुषदेहानामपरावर्त्तिवर्त्तिनाम्।
सम्प्रवेक्ष्याम्यहं योगमात्मनश्च परस्य च॥
सम्प्राप्य मानुषं लोकं मानुषत्वमुपागतः।
कंसादींस्तांश्च सर्व्वांश्च वधिष्यामि महासुरान्॥
तेन तेन विधानेन येन यः शान्तिमेष्यति।
अनुप्रविश्य योगेन तास्ता हि गतयो मया॥
अमीषां हि सुरेन्द्राणां हन्तव्या रिपवो युधि।
जगत्यर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः॥
सुरदेवर्षिगन्धर्व्वैरितश्चानुमते मम।
विनिश्चयो हि प्रागेव नारदायं कृतो मया॥
निवासं तत्र मे ब्रह्मा विदधातु पितामहः।
यत्र देशे यथा जातो येन वेशेन वा वसन्॥
तानहं समरे हन्यां तन्मे ब्रूहि पितामह!॥
ब्रह्मोवाच।
नारायणेमं सिद्धार्थमुपायं शृणु मे विभो!।
भुवि यस्ते जनयिता जननी च भविष्यति॥